# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ४** | |
| विषयः - साहित्यम् ( ध्वनिवर्गः ) | (C.C.-5.3.9. Old & New ) | गुणाः - ७० |
| दिनाङ्कः - ०७/१२/२०१८ | *ग्रन्थः व्यक्तिविवेकः(प्रथमो विमर्शः)* | समयः -१०.०० तः ०१.०० |

**प्रथमान्विति:**

**प्रश्नः १ अधोनिर्दिष्ट्राभ्यामेकस्याः कारिकायाः ससन्दर्भं व्याख्यां कुर्वन्तु ।** ( ५ )

*(१) सहसा यशोऽभिसर्तुंसमुद्यतादृष्टदर्पणा मम धीः ।*
*स्वालङ्कारविकल्पप्रकल्पने वेत्ति कथमिबावधम् ॥*

*(२) उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम् ।*
*गमकत्वान्न तत् तस्य युक्तमन्यभिचारतः ॥*

**प्रश्नः २** *ध्वनिसम्प्रादयस्य उद्भवविकासं वर्णयत।* ( १० )

*(अथवा)*

*ग्रन्थकारस्य परिचयं विस्तरेण प्रयच्छत।*

**द्वितीयान्विति:**

**प्रश्नः ३ कस्याप्येकस्याः कारिकायाः ससन्दर्भं व्याख्या कार्या ।** ( ५ )

*(१) घटतीति घटो ज्ञेयो नाघटन् घटतामियात् ।*
*अघटत्वाविशेषेण पटोऽपि स्याद् घटोऽन्यथा ॥*

*(२) न तत्त्वसादनं युक्तं तदतुल्यक्रियस्य हि ॥*
सत्तायां व्यापृतिश्चैषाचित्रत्वपरिनिष्ठितेः ॥

**प्रश्नः ४** *अनुकार्यस्य शब्दस्यार्थस्य वा कथं नोपसर्जनीकृतात्मत्वं सम्भवति ? इति महिमभट्टदिशा प्रतिपाद्यताम् ।* ( १० )

**( अथवा )**

*सत्वप्रधानानि वाक्यानि - इति यथा ग्रन्थं साधयत।*

**तृतीयान्विति:**

**प्रश्नः ५ यथेच्छं एकस्योत्तरं लिखत ।** ( ५ )

*(१) तत्र पदस्यार्थो वाच्य एव नानुमेयः, तस्य निरंशत्वात् साध्यसाधनभावाभावतः ।*

*(२) मुख्यवृत्या द्विविधो एवार्थो वाच्यो गम्यश्चेति ।*
*उपचारतस्तु व्यङ्ग्यस्तृतीयो समस्तीति सिद्धम् ॥*

**प्रश्नः ६** *महिमभट्टस्य मते अर्थस्य द्वैविध्यं प्रकाश्य वाच्यार्थस्य स्वरुपं प्रकाशय।* **( १० )**

**( अथवा )**

*व्यक्तिविवेकदिशा प्रमाणानां त्रैविध्यं विवेचयत।*

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्याप्येकस्य ससन्दर्भं विवेचनं कुरुत । ( ५ )**

*(१) यद्यर्थ इति वाच्योऽर्थोऽभिमतोऽव्याप्तिरेव सा।*
*येनैवंवादिनीत्यादावर्थस्यार्थान्तराद्गतिः ॥*

*(२) द्वाभ्यामन्तरितां सोदाहरणं साधयत।*

**प्रश्नः ८** *प्रतीयमानार्थे वस्त्वलङ्कारप्रसङ्गे कथं ध्वनिप्रसङ्गं न सङ्गच्छतीति महिमभट्टदिशा विवेचयत।* **( १० )**

**( अथवा )**

*त्रिभिस्त्तरितां सोदाहरणं साधयत।*

**प्रश्नः ७ दशप्रश्नानां लघूत्तराणि लिखत । ( १० )**

*(१) महिमभट्टस्य पितुर्नाम किम् ?*
*(२) राजानक इत्युपाधिः कस्य वर्तते ?*
*(३) प्रथमविमर्शे को विषयः प्रतिपादितोऽस्ति ?*
*(४) अर्थः कतिविधः ?*
*(५) प्रमाणं कतिविधम् ?*
*(६) वेदप्रमाणं कस्मात् ?*
*(७) प्रकाशकोऽर्थः कतिविधः ?*
*(८) त्रयप्रकाशाः के ?*
*(९) भक्तिलक्षणायाः कति प्रकाराः ?*
*(१०) व्यक्तिविवेकः इत्यस्य कः आशयः ?*
*(११) पदार्थस्य कति भेदाः ?*
*(१२) अनुमानेरन्तर्भावः क प्रदर्शितवान् ?*
*(१३) व्यक्तिविमर्शे कति विमर्शाः सन्ति ?*
*(१४) अनुमितौ कति पदार्थाः अपेक्ष्यन्ते ?*
*(१५) तत्त्वोक्तिकोशस्य कर्ता कोऽस्ति ?*

--००--